अथश्रीबृहदारण्योपनिषत्प्रारंभः

LIBRARY
UNIVERSITY
PENNSYLVANIA

॥बृ॰अ॰३॥ श्रीगणेशाय नमः॥ ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ ॐ शांतिः ३॥ ॥ अ॰१
॥१॥ हरिः ॐ॥ उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्य
स्य द्यौः पृष्ठमंतरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवांतरदिशः पर्शव ऋतवोंगानि मासाश्चार्धमासाश्च पर्वा
ण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मांसा ऊवध्यं सिकताः सिंधवो गुदा यकृच्च क्लोमानश्च पर्व
ता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचंजघनार्धो यद्विजृंभते तद्विद्योतते यद्विधूनुते तत्स्त
नयति यन्मेहति तद्वर्षति वागेवास्य वाक्॥१॥ अहर्वा अश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रा
त्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः संबभूवतुर्हयो भूत्वा देवानव
हद्वाजी गंधर्वानर्वासुरानश्वो मनुष्यान्समुद्र एवास्य बंधुः समुद्रो योनिः॥२॥ ॥प्रथमं ब्राह्मणं॥ ॥ नैवेह किंच
नाग्र आसीन्मृत्युनैवेदमावृतमासीदशनाययाशनाया हि मृत्युस्तन्मनोकुरुतात्मन्वी स्यामिति सोर्चन्नचर
त्तस्यार्चत आपोजायंतार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं कं ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं १

वेद ॥१॥ आपो वा अर्कस्तद्यदपाꣳ शर आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो
निरवर्ततागिः ॥२॥ स त्रेधात्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयꣳ स एष प्राणस्त्रेधा विहितस्तस्य प्राची दिक्शिरोऽ
सौ चासौ चेर्मावथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः
स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥३॥ सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा
वाचं मिथुनꣳ समभवदशनाया मृत्युस्तद्यद्रेत आसीत्स संवत्सरोऽभवन्न ह पुरा ततः संवत्सर आस तमेतावन्तं काल
मबिभर्यावान्त्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददात्स भाणकरोत्सैव वागभवत् ॥४॥
स ऐक्षत यदि वा इममभिमꣳस्ये कनीयोऽन्नं करिष्य इति स तया वाचा तेनात्मनेदꣳ सर्वमसृजत यदिदं किं चर्चो यजूं
षि सामानि छन्दाꣳसि यज्ञान्प्रजाः पशून्स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वꣳ सर्वस्यैतस्या
त्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥५॥ सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स त
पोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत तस्य
शरीर एव मन आसीत् ॥६॥ सोऽकामयत मेध्यं म इदꣳ स्यादात्मन्व्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभू

बृ॰अ॰३ दितितदेवाश्वमेधस्याश्वमेधत्वमेषहवाअश्वमेधंवेदयएनमेवंवेदतमनवरुध्यैवामन्यततᳪसंवत्सरस्यपरस्तादात्म अ॰१
२ नआलभततपशून्देवताभ्यःप्रत्यौहत्तस्मात्सर्वदेवत्यंप्रोक्षितंप्राजापत्यमालभंतएषवाअश्वमेधोयएषतपतितस्य
संवत्सरआत्माअयमग्निरर्कस्तस्येमेलोकाआत्मानस्तावेतावर्काश्वमेधौसोपुनरेकैवदेवताभवतिमृत्युरेवाप
पुनर्मृत्युंजयतिनैनंमृत्युराप्नोतिमृत्युरस्यात्माभवत्येतासांदेवतानामेकोभवति॥७॥ ॥इतिद्वितीयंब्राह्मणं॥ ॥द्वयाहप्रा
जापत्यादेवाश्चासुराश्चततःकानीयसाएवदेवाज्यायसाअसुरास्तएषुलोकेष्वस्पर्धंततेहदेवाऊचुर्हंतासुरान्यज्ञउ
द्गीथेनात्ययामेति॥१॥तेहवाचमूचुस्त्वंनउद्गायेतितथेतितेभ्योवागुदगायद्योवाचिभोगस्तंदेवेभ्यआगायद्यत्कल्या
णंवदतितदात्मनेतेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभिद्रुत्यपाप्मनाविध्यन्सयःसपाप्मायदेवेदमप्रतिरूपंवदति
सएवसपाप्मा॥२॥अथहप्राणमूचुस्त्वंनउद्गायेतितथेतितेभ्यःप्राणउदगायद्यःप्राणेभोगस्तंदेवेभ्यआगाय
द्यत्कल्याणंजिघ्रतितदात्मनेतेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभिद्रुत्यपाप्मनाविध्यन्सयःसपाप्मायदेवेदम
प्रतिरूपंजिघ्रतिसएवसपाप्मा॥३॥अथहचक्षुरूचुस्त्वंनउद्गायेतितथेतितेभ्यश्चक्षुरुदगायद्यश्चक्षुषिभोग
स्तंदेवेभ्यआगायद्यत्कल्याणंपश्यतितदात्मनेतेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभिद्रुत्यपाप्मनाविध्यन्स

यःसपाप्मायदेवेदमप्रतिरूपंपश्यतिसएवसपाप्मा॥४॥अथहश्रोत्रमूचुस्त्वंनउद्गायेतितथेतितेभ्यःश्रोत्रमुदगायद्यःश्रो
त्रेभोगस्तंदेवेभ्यआगायद्यत्कल्याणंशृणोतितदात्मनेतेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभिद्रुत्यपाप्मनाविध्य
न्सयःसपाप्मायदेवेदमप्रतिरूपंशृणोतिसएवसपाप्मा॥५॥अथहमनऊचुस्त्वंनउद्गायेतितथेतितेभ्योमनउदगा
यद्योमनसिभोगस्तंदेवेभ्यआगायद्यत्कल्याणंसंकल्पयतितदात्मनेतेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभि
द्रुत्यपाप्मनाविध्यन्सयःसपाप्मायदेवेदमप्रतिरूपंसंकल्पयतिसएवसपाप्मैवमुखल्वेतादेवताःपाप्मभिरु
पासृजन्नेवमेनाःपाप्मनाविध्यन्॥६॥अथहेममासन्यंप्राणमूचुस्त्वंनउद्गायेतितथेतितेभ्यएषप्राणउदगा
यत्तेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभिद्रुत्यपाप्मनाविव्यत्सन्सयथाश्मानमृत्वालोष्टोविध्वंसेतैव
ꣳहैवविध्वंसमानाविष्वंचोविनेशुस्ततोदेवाअभवन्परासुराभवत्यात्मनापरास्यद्विषन्भ्रातृव्योभवतियए
वंवेद॥७॥तेहोचुःक्वनुसोभूद्योनइत्थमसक्तेत्ययमास्येंतरितिसोयास्यआंगिरसोंगानांहिरसः॥८॥सावाएषा
देवतादूर्नामदूरंह्यस्यामृत्युर्दूरंहवाअस्मान्मृत्युर्भवतियएवंवेद॥९॥सावाएषादेवतैतासांदेवतानांपाप्मानं
मृत्युमपहत्ययत्रासांदिशामंतस्तद्गमयांचकारतदासांपाप्मनोविन्यदधात्तस्मान्नजनमियान्नांतमियान्नेत्पाप्मा

च्यत्ता दिशोऽभवꣲस्ता इमा दिशः परेण मृत्युमतिक्रांताः ।१५। अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत =

नं मृत्युमन्ववायानीति ।१०। सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैना मृत्युमत्यवह त् ।११। स वै अ॰१
।।बृ॰अ॰३।। वाचमेव प्रथमामत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रांतो दीप्यते ।१२। अथ
।।३।। प्राणमत्यवहत्स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रांतः पवते ।१३। अथ चक्षुरत्यव
हत्तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत्सोऽसावादित्यः परेण मृत्युमतिक्रांतस्तपति ।१४। अथ श्रोत्रमत्यवह
त्तद्यदा मृत्युमत्यमुच्यत स चंद्रमा अभवत्सोऽसौ चंद्रः परेण मृत्युमतिक्रांतो भात्येवꣲ ह वा एनमेषा देवता मृत्युमतिवहति
य एवं वेद ।१६। अथात्मनेऽन्नाद्यमागायद्यद्धि किंचान्नमद्यतेऽनेनैव तदद्यत इह प्रतितिष्ठति ।१७। ते देवा अब्रुवन्नेतावद्वा
इदꣲ सर्वं यदन्नं तदात्मन आगासीरनु नोऽस्मिन्नन्न आभजस्वेति ते वै माभिसंविशतेति तथेति तꣲ समंतं परिण्यविशंत त
स्माद्यदनेनान्नमत्ति तेनैतास्तृप्यंत्येवꣲ ह वा एनꣲ स्वा अभिसंविशंति भर्ता स्वानाꣲ श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य
एवं वेद य उ हैवंविदꣲ स्वेषु प्रति प्रतिर्बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनु भवति यो वैतमनु भार्यान्बुभूर्षति
स हैवालं भार्येभ्यो भवति ।१८। सोऽयास्य आंगिरसोऽंगानाꣲ हि रसः प्राणो वा अंगानाꣲ रसः प्राणो हि वा अंगानाꣲ रसस्त ३
स्माद्यस्मात्कस्माच्चांगात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अंगानाꣲ रसः ।१९। एष उ एव बृहस्पतिर्वाग्वै बृह

तीतस्याएषपतिस्तस्मादुबृहस्पतिः।२०।एषउएवब्रह्मणस्पतिर्वाग्वैब्रह्मतस्याएषपतिस्तस्मादुब्रह्मणस्पतिः।२१।ए
षउएवसामवाग्वैसामैषसाचामश्चेति तत्साम्नः सामत्वंयद्वेवसमःप्लुषिणासमोमशकेनसमोनागेनसम
एभिस्त्रिभिर्लोकैःसमोनेनसर्वेणतस्माद्वेवसामाश्नुतेसाम्नःसायुज्यंसलोकतांयएवमेतत्सामवेद।२२।एषउवा
उद्गीथःप्राणोवाउत्प्राणेनहीदंसर्वमुत्तब्धंवागेवगीथोच्चगीथाचेतिसउद्गीथः।२३।तद्धापिब्रह्मदत्तश्चैकितानेयो
राजानंभक्षयन्नुवाचायंत्यस्यराजामूर्धानंविपातयताद्यदितोयास्यआंगिरसोन्येनोदगायदितिवाचाचह्येवसप्रा
णेनचोदगायदिति।२४।तस्यहैतस्यसाम्नोयःस्वंवेदभवतिहास्यस्वंतस्यवैस्वरएवस्वंतस्मादार्त्विज्यंकरिष्यन्वा
चिस्वरमिच्छेततयावाचास्वरसंपन्नयार्त्विज्यंकुर्यात्तस्माद्यज्ञेस्वरवंतंदिदृक्षंतएवाथोयस्यस्वंभवतिभवतिहा
स्यस्वंयएवमेतत्साम्नःस्वंवेद।२५।तस्यहैतस्यसाम्नोयःसुवर्णंवेदभवतिहास्यसुवर्णंतस्यवैस्वरएवसुवर्णंभ
वतिहास्यसुवर्णंयएवमेतत्साम्नःसुवर्णंवेद।२६।तस्यहैतस्यसाम्नोयःप्रतिष्ठांवेदप्रतिहतिष्ठतितस्यवैवागेवप्र
तिष्ठावाचिहिखल्वेषएतत्प्राणःप्रतिष्ठितोगीयतेन्नइत्युहैकआहुः।२७।अथातःपवमानानामेवाभ्यारोहःस
वैखलुप्रस्तोतासामप्रस्तौतिसयत्रप्रस्तुयात्तदेतानिजपेदसतोमासद्गमयतमसोमाज्योतिर्गमयमृत्योर्मामृतं

बृ.अ.३ गमयेतिसयदाहासतोमासद्गमयेतिमृत्युर्वाअसत्सदमृतंमृत्योर्मामृतंगमयामृतंमाकुर्वित्येवैतदाहतम अ.१
४ सोमाज्योतिर्गमयेतिमृत्युर्वैतमोज्योतिरमृतंमृत्योर्मामृतंगमयामृतंमाकुर्वित्येवैतदाहमृत्योर्मामृतंगम
येतिनात्रतिरोहितमिवास्तिअथयानीतराणिस्तोत्राणितेष्वात्मनेन्नाद्यमागायेत्तस्मादुतेषुवरंवृणीतयंका
मंकामयेततं सएषएवंविदुद्गातात्मनेवायजमानायवायंकामंकामयतेतमागायतितद्धैतल्लोकजिदेवन
हैवालोक्यतायाआशास्तियएवमेतत्सामवेद॥२८॥ ॥इतितृतीयंब्राह्मणं॥ ॥आत्मैवेदमग्रआसीत्पुरुषविधः
सोनुवीक्ष्यनान्यदात्मनोपश्यत्सोहमस्मीत्यग्रेव्याहरत्ततोहंनामाभवत्तस्मादप्येतर्ह्यामंत्रितोहमयमित्येवा
ग्रउक्त्वाथान्यंनामप्रब्रूतेयदस्यभवतिसयत्पूर्वोस्मात्सर्वस्मात्सर्वान्पाप्मनऔषत्तस्मात्पुरुषओषतिहवैस
तंयोस्मात्पूर्वोबुभूषतियएवंवेद॥१॥सोबिभेत्तस्मादेकाकीबिभेतिसहायमीक्षांचक्रेयन्मदन्यन्नास्तिकस्मान्नु
बिभेमीतिततएवास्यभयंवीयायकस्माद्ध्यभेष्यद्द्वितीयाद्वैभयंभवति॥२॥सवैनैवरेमेतस्मादेकाकीनरमतेस
द्वितीयमैच्छत्सहैतावानासयथास्त्रीपुमांसौसंपरिष्वक्तौसइममेवात्मानंद्वेधापातयत्ततःपतिश्चपत्नीचाभ
वतांतस्मादिदमर्धबृगलमिवस्वइतिहस्माहयाज्ञवल्क्यस्तस्मादयमाकाशःस्त्रियापूर्यतएवतांसमभवत्ततो

मनुष्यांश्चाजायंत ॥३॥ साहेयमीक्षांचक्रेकथंनुमात्मनएवजनयित्वासंभवतिहंततिरोसानीतिसागौरभवदृषभइ
तरस्ताꣳसमेवाभवत्ततोगावोजायंतवडवेतराभवदश्ववृषइतरोगर्दभीतरागर्दभइतरस्ताꣳसमेवाभवत्ततएकशफ
मजायताजेतराभवद्बस्तइतरोविरितरामेषइतरस्ताꣳसमेवाभवत्ततोजावयोजायंतैवमेवयदिदंकिंचमिथुनमापि
पीलिकाभ्यस्तत्सर्वमसृजत ॥४॥ सोवेदहंवावसृष्टिरस्म्यहꣳहीदꣳसर्वमसृक्षीतिततःसृष्टिरभवत्सृष्ट्याꣳहास्यैत
स्यांभवतियएवंवेद ॥५॥ अथेत्यभ्यमंथत्समुखाच्चयोनेर्हस्ताभ्यांचाग्निमसृजततस्मादेतदुभयमलोमकमंतरतो
लोमकाहियोनिरंतरतस्तद्यदिदमाहुरमुंयजामुंयजेत्येकैकंदेवमेतस्यैवसाविसृष्टिरेषउह्येवसर्वेदेवाःअथयत्
किंचेदमार्द्रंतद्रेतसोसृजततदुसोमएतावद्वाइदमन्नंचैवान्नादश्चसोमएवान्नमग्निरन्नादःसैषाब्रह्मणोति
सृष्टिर्यच्छ्रेयसोदेवानसृजताथयन्मर्त्यःसन्नमृतानसृजततस्मादतिसृष्टिरतिसृष्ट्याꣳहास्यैतस्यांभव
तियएवंवेद ॥६॥ तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतासौनामायमिदꣳरूपइतितदि
दमप्येतर्हिनामरूपाभ्यामेवव्याक्रियतेसौनामायमिदꣳरूपइतिसएषइहप्रविष्टआनखाग्रेभ्योयथा
क्षुरःक्षुरधानेवहितःस्याद्विश्वंभरोवाविश्वंभरकुलायेतन्नपश्यंत्यकृत्स्नोहिसप्राणन्नेवप्राणोनामभव

तिवदन्वाक्पश्यꣳश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानोमनस्तान्यस्यैतानि कर्मनामान्येव स यो त एकैकमुपास्ते न स वेदा श्री॰१
॥बृ॰अ॰३॥ कृत्स्नो ह्येषोत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एकं भवंति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा ने
॥५॥ न ह्येतत्सर्वं वेद यथा ह वै पदेनानुविंदेदेवं कीर्तिꣳ श्लोकं विंदते य एवं वेद ॥७॥ तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रे
यो न्यस्मात्सर्वस्मादंतरतरं यदयमात्मा स यो न्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियꣳ रोत्स्यतीतीश्वरो ह तथैव
स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥८॥ तदाहुर्यद्ब्रह्म
विद्यया सर्वं भविष्यंतो मनुष्या मन्यंते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥९॥ ब्रह्म वा इदमग्र आसीत्तदा
त्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथाम
नुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेहं मनुरभवꣳ सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति
स इदꣳ सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषाꣳ स भवति अथ यो न्यां देवतामुपास्ते न्यो सावन् राम
न्योहमस्मीति न स वेद यथा पशुरेवꣳ स देवानां यथा ह वै बहवः पशवो मनुष्यं भुंज्युरेवमेकैकः पुरुषो देवान् ५
भुनक्त्येकस्मिन्नेव पशावादीयमाने प्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥१०॥

ब्रह्मवाइदमग्रआसीदेकमेवतदेकंसन्नव्यभवत्तच्छ्रेयोरूपमत्यसृजतक्षत्रंयान्येतानिदेवत्राक्षत्राणींद्रोवरुणःसोमोरुद्रः
पर्जन्योयमोमृत्युरीशानइतितस्मात्क्षत्रात्परंनास्तितस्माद्ब्राह्मणःक्षत्रियमधस्तादुपास्तेराजसूयेक्षत्रएवतद्यशोदधा
तिसैषाक्षत्रस्ययोनिर्यद्ब्रह्मतस्माद्यद्यपिराजापरमतांगच्छतिब्रह्मैवांततउपनिश्रयतिस्वांयोनिंयउएनंहिनस्तिस्वांस
योनिमृच्छतिसपापीयान्भवतियथाश्रेयांसंहिंसित्वा॥११॥सनैवव्यभवत्सविशमसृजतयान्येतानिदेवजातानिगणश
आख्यायंतेवसवोरुद्राआदित्याविश्वेदेवामरुतइति॥१२॥सनैवव्यभवत्सशौद्रंवर्णमसृजतपूषणमियंवैपूषेयंहीद
ंसर्वंपुष्यतियदिदंकिंच॥१३॥सनैवव्यभवत्तच्छ्रेयोरूपमत्यसृजतधर्मंतदेतत्क्षत्रस्यक्षत्रंयद्धर्मस्तस्माद्धर्मात्परंनास्त्य
थोअबलीयान्बलीयांसमाशंसतेधर्मेणयथाराज्ञैवंयोवैसधर्मःसत्यंवैतत्तस्मात्सत्यंवदंतमाहुर्धर्मंवदतीतिध
र्मंवावदंतंसत्यंवदतीत्येतद्ध्येवैतदुभयंभवति॥१४॥तदेतद्ब्रह्मक्षत्रंविट्शूद्रस्तदग्निनैवदेवेषुब्रह्माभवद्ब्राह्मणोम
नुष्येषुक्षत्रियेणक्षत्रियोवैश्येनवैश्यःशूद्रेणशूद्रस्तस्मादग्नावेवदेवेषुलोकमिच्छंतेब्राह्मणेमनुष्येष्वेताभ्यांहि
रूपाभ्यांब्रह्माभवदथयोहवाअस्माल्लोकात्स्वंलोकमदृष्ट्वाप्रैतिसएनमविदितोनभुनक्तियथावेदोवाननूक्तोऽन्यद्वाकर्मा
कृतंयदिहवाअप्यनेवंविन्महत्पुण्यंकर्मकरोतितद्धास्यांततःक्षीयतएवात्मानमेवलोकमुपासीतसयआत्मानमेवलोकं

ब्रह्मवाइदमग्रआसीदेकमेवतदेकं९सन्नव्यभवत्तच्छ्रेयोरूपमत्यसृजतक्षत्रंयान्येतानिदेवत्राक्षत्राणींद्रोवरुणःसोमोरुद्रः
पर्जन्योयमोमृत्युरीशानइतितस्मात्क्षत्रात्परंनास्तितस्माद्ब्राह्मणःक्षत्रियमधस्तादुपास्तेराजसूयेक्षत्रएवतद्यशोदधा
तिसैषाक्षत्रस्ययोनिर्यद्ब्रह्मतस्माद्यद्यपिराजापरमतांगच्छतिब्रह्मैवांततउपनिश्रयतिस्वांयोनिंयउएनं९हिनस्तिस्वां९स
योनिमृच्छतिसपापीयान्भवतियथाश्रेयां९सं९हिं९सित्वा॥११॥सनैवव्यभवत्सविशमसृजतयान्येतानिदेवजातानिगणश
आख्यायंतेवसवोरुद्राआदित्याविश्वेदेवामरुतइति॥१२॥सनैवव्यभवत्सशौद्रंवर्णमसृजतपूषणमियंवैपूषेयं९हीद
ं९सर्वंपुष्यतियदिदंकिंच॥१३॥सनैवव्यभवत्तच्छ्रेयोरूपमत्यसृजतधर्मंतदेतत्क्षत्रस्यक्षत्रंयद्धर्मस्तस्माद्धर्मात्परंनास्त्य
थोअबलीयान्बलीयां९समाशं९सतेधर्मेणयथाराज्ञैवंयोवैसधर्मःसत्यंवैतत्तस्मात्सत्यंवदंतमाहुर्धर्मंवदतीतिध
र्मंवावदंतं९सत्यंवदतीत्येतद्ध्येवैतदुभयंभवति॥१४॥तदेतद्ब्रह्मक्षत्रंविट्शूद्रस्तदग्निनैवदेवेषुब्रह्माभवद्ब्राह्मणोम
नुष्येषुक्षत्रियेणक्षत्रियोवैश्येनवैश्यःशूद्रेणशूद्रस्तस्मादग्नावेवदेवेषुलोकमिच्छंतेब्राह्मणेमनुष्येषुएताभ्यां९हि
रूपाभ्यांब्रह्माभवदथयोहवाअस्माल्लोकात्स्वंलोकमदृष्ट्वाप्रैतिसएनमविदितोनभुनक्तियथावेदोवाननूक्तोन्यद्वाकर्मा
कृतंयदिहवाअप्यनेवंविन्महत्पुण्यंकर्मकरोतितद्धास्यांततःक्षीयतएवात्मानमेवलोकमुपासीतसयआत्मानमेवलोकं

ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत्तच्छ्रेयो रूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः
पर्जन्यो यमो मृत्युरीशान इति तस्मात्क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधा
ति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवांतत उपनिश्रयति स्वां योनिं य उ एनं हिनस्ति स्वां स
योनिमृच्छति स पापीयान्भवति यथा श्रेयांसं हिंसित्वा ॥११॥ स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश
आख्यायंते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति ॥१२॥ स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयं हीदं
सर्वं पुष्यति यदिदं किंच ॥१३॥ स नैव व्यभवत्तच्छ्रेयो रूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्य
थो अबलीयान्बलीयांसमाशंसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदंतमाहुर्धर्मं वदतीति ध
र्मं वा वदंतं सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति ॥१४॥ तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो म
नुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छंते ब्राह्मणे मनुष्येष्वेताभ्यां हि
रूपाभ्यां ब्रह्माभवदथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोऽन्यद्वा कर्मा
कृतं यदिह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यांततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोक

बृ.अ.३ मुपास्तेनहास्यकर्मक्षीयतेस्माद्ध्येवात्मनोयद्यत्कामयतेतत्तत्सृजते।१५।।अथोअयंवाआत्मासर्वेषांभूतानांलोकःसय श्री।
६ ज्जुहोतियद्यजतेतेनदेवानांलोकोऽथयदनुब्रूतेतेनऋषीणामथयत्पितृभ्योनिपृणातियत्प्रजामिच्छतेतेनपितॄणामथयन्म
नुष्यान्वासयतेयदेभ्योऽशनंददातितेनमनुष्याणामथयत्पशुभ्यस्तृणोदकंविंदतितेनपशूनांयदस्यगृहेषुश्वापदावयां
ऽस्यापिपीलिकाभ्यउपजीवंतितेनतेषांलोकोयथाहवैस्वायलोकायारिष्टिमिच्छेदेवंहैवंविदेसर्वाणिभूतान्यरिष्टिमि
च्छंतितद्वाएतद्विदितंमीमांसितं।१६।।आत्मैवेदमग्रआसीदेकएवसोऽकामयतजायामेस्यादथप्रजायेयाथवित्तंमेस्या
दथकर्मकुर्वीयेत्येतावान्वैकामोनेच्छंश्चनातोभूयोविंदेत्तस्मादप्येतर्ह्येकाकीकामयतेजायामेस्यादथप्रजायेया
थवित्तंमेस्यादथकर्मकुर्वीयेतिसयावदप्येतेषामेकैकंनप्राप्नोत्यकृत्स्नएवतावन्मन्यतेतस्योकृत्स्नतामनएवास्यात्मा
वाग्जायाप्राणःप्रजाचक्षुर्मानुषंवित्तंचक्षुषाहितद्विंदतेश्रोत्रंदैवंश्रोत्रेणहितच्छृणोत्यात्मैवास्यकर्मात्मनाहिकर्मक
रोतिसएषपांक्तोयज्ञःपांक्तःपशुःपांक्तःपुरुषःपांक्तमिदंसर्वंयदिदंकिंचतदिदंसर्वमाप्नोतियएवंवेद।१७।। इतिचतुर्थंब्राह्मणं
।।यत्सप्तान्नानिमेधयातपसाजनयत्पिता।एकमस्यसाधारणंद्वेदेवानभाजयत्।त्रीण्यात्मनेऽकुरुतपशुभ्यएकंप्राय
च्छत्।तस्मिन्सर्वंप्रतिष्ठितंयच्चप्राणितियच्चन।कस्मात्तानिनक्षीयंतेऽद्यमानानिसर्वदा।योवैतामक्षितिंवेदसोऽन्न

मत्तिप्रतीकेन।सदेवानपिगच्छतिसऊर्जमुपजीवतीतिश्लोकाः॥यत्सप्तान्नानिमेधयातपसाजनयत्पितेतिमेधयाहितपसा
जनयत्पितैकमस्यसाधारणमितीदमेवास्यतत्साधारणमन्नंयदिदमद्यतेसयएतदुपास्तेनसपाप्मनोव्यावर्ततेमि
श्रंह्येतत्द्वेदेवानभाजयदितिहुतंचप्रहुतंचतस्माद्देवेभ्योजुह्वतिचप्रचजुह्वत्यथोआहुर्दर्शपूर्णमासावितितस्मात्
नेष्टियाजुकःस्यात्पशुभ्यएकंप्रायच्छदितितत्पयःपयोह्येवाग्रेमनुष्याश्चपशवश्चोपजीवंतितस्मात्कुमारंजातंघृ
तंवैवाग्रेप्रतिलेहयंतिस्तनंवानुधापयंत्यथवत्संजातमाहुरतृणादइतितस्मिन्सर्वंप्रतिष्ठितंयच्चप्राणितियच्चनेतिप
यसिहीदंसर्वंप्रतिष्ठितंयच्चप्राणितियच्चनतद्यदिदमाहुःसंवत्सरंपयसाजुह्वदपपुनर्मृत्युंजयतीतिनतथाविद्याद्यदह
रेवजुहोतितदहःपुनर्मृत्युमपजयत्येवंविद्वान्सर्वंहिदेवेभ्योन्नाद्यंप्रयच्छतिकस्मात्तानिनक्षीयंतेद्यमानानिसर्व
देतिपुरुषोवाअक्षितिःसहीदमन्नंपुनःपुनर्जनयतेयोवैतामक्षितिंवेदेतिपुरुषोवाअक्षितिःसहीदमन्नंधि
याधियाजनयतेकर्मभिर्यद्धैतन्नकुर्यात्क्षीयेतहसोन्नमत्तिप्रतीकेनेतिमुखंप्रतीकंमुखेनेत्येतत्सदेवानपि
गच्छतिसऊर्जमुपजीवतीतिप्रशंसा॥२॥त्रीण्यात्मनेकुरुतेतिमनोवाचंप्राणंतान्यात्मनेकुरुतान्यत्रमनाअ
भूवंनादर्शमन्यत्रमनाअभूवंनाश्रौषमितिमनसाह्येवपश्यतिमनसाशृणोतिकामःसंकल्पोविचिकित्साश्र
द्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवतस्मादपिपृष्ठतउपस्पृष्टोमनसाविजानातियःकश्चशब्दो

वागेव सैषा ह्यन्तमायत्तैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एवैतन्मयो वा अयमात्मा वाङ्म ॥अ॰१॥
॥बृ॰अ॰३॥ यो मनोमयः प्राणमयः ॥३॥ त्रयो लोका एत एव वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥४॥ त्रयो वेदा एत
॥१७॥ एव वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥५॥ देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितरः प्राणो मनु
ष्याः ॥६॥ पिता माता प्रजैत एव मन एव पिता वाङ्माता प्राणः प्रजा ॥७॥ विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्
किंच विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वावति ॥८॥ यत्किंच विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजि
ज्ञास्यं मन एनं तद्भूत्वावति ॥९॥ यत्किंचाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वावति ॥१०॥ तस्यै
वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥११॥ अथैतस्य मन
सो द्यौः शरीरं ज्योतीरूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनं समैतां त
तः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥१२॥ अथैतस्य प्रा
णस्यापः शरीरं ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रस्त एते सर्व एव समाः ॥राम॥
सर्वेऽनन्ताः स यो हैतानन्तवत उपास्तेऽन्तवन्तं स लोकं जयत्यथ यो हैताननन्तानुपास्तेऽनन्तं स लोकं जयति ॥१३॥ स ए ॥७॥

ष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पंचदश कला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यते प
च क्षीयते सोमावास्यांऽरात्रिमेतया षोळश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेतांऽ
रात्रिं प्राणभृतः प्राणं न विछिंद्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥१४॥ यो वै स संवत्सरः प्रजाप
तिः षोळशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पंचदश कला आत्मैवास्य षोळशी कला स वित्तेनै
वा च पूर्यते प च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्र
धिनागादित्येवाहुः ॥१५॥ अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो
नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानांऽश्रेष्ठस्तस्माद्विद्यां प्रशंऽसंति ॥१६॥
अथातः संप्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लो
क इति यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता ये वै के च यज्ञास्तेषांऽसर्वेषां यज्ञ इत्येकता ये वै के च लोका
स्तेषांऽसर्वेषां लोक इत्येकतैतावद्वा इदंऽसर्वमेतन्मा सर्वंऽसन्नयमितोऽभुनजदिति तस्मात्पुत्रमनुशिष्टं लोक्य

॥बृ०भा०३॥ मा छिनत्तस्मादेनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति स यद्यनेन किंचि ॥भा०१

॥ब्रा॥ दक्ष्णया कृतं भवति तस्मादेनꣳ सर्वस्मात्पुत्रो मुंचति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिंल्लोके प्रतितिष्ठ

त्यथैनमेते दैवाः प्राणा अमृता आविशंति ॥१७॥ पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया

यद्यदेव वदति तत्तद्भवति ॥१८॥ दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनानंद्येव भवत्यथो न

शोचति ॥१९॥ अद्भ्यश्चैनं चंद्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः संचरꣳश्चासंचरꣳश्च न व्यथ

तेऽथो न रिष्यति स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैवꣳ स यथैतां देवताꣳ सर्वाणि भूतान्यवं

त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवंति यदु किंचेमाः प्रजाः शोचंत्यमैवासां तद्भवति पुण्यमेवामुं गच्छति न

ह वै देवान्पापं गच्छति ॥२०॥ अथातो व्रतमीमाꣳसा प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टान्यन्योन्येनास्प

र्धंत वदिष्याम्येवाहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथा राम

कर्म तानि मृत्युः श्रमो भूत्वोपयेमे तान्याप्नोत्तान्याप्त्वा मृत्युरवारुंधत तस्माच्छ्राम्यत्येव वाक् श्राम्यति चक्षुः ८

श्राम्यति श्रोत्रमथेममेव नाप्नोद्योऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरेऽयं वै नः श्रेष्ठो यः संचरंश्चासंचरंश्च न व्यथतेऽथो
न रिष्यति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवंस्तस्मादेत एतेनाख्यायन्ते प्राणा इति तेन ह वाव तत्कुल
माचक्षते यस्मिन् कुले भवति य एवं वेद य उ हैवंविदा स्पर्धतेऽनुशुष्यत्यनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मम् ॥२१॥ अथाधिदैवतं ज्वलि
ष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा एवमन्या देवता यथादैवतं स यथैषां
प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुर्म्लोचन्ति ह्यन्या देवता न वायुः सैषानस्तमिता देवता यद्वायुः ॥२२॥ अ
थैष श्लोको भवति यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मं स एवा
द्य स उ श्व इति यद्वा एतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृ
त्युराप्नुवदिति यद्यु चरेत्समापिपयिषेत्तेनैतस्यै देवतायै सायुज्यं सलोकतां जयति ॥२३॥ ॥इति पंचमं ब्राह्मणम्॥
॥ ॥त्रयं वा इदं नाम रूपं कर्म तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्त्येतदेषां सामैतद्धि
सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥१॥ अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वा

बृ·अ·३ णि रूपाण्युत्तिष्ठंत्येतदेषाꣳ सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥२॥ अथ कर्मणामा श्री·२

२ त्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठंत्येतदेषाꣳ सामैतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि

कर्माणि बिभर्ति तदेतत्त्रयꣳ सदेकमयमात्मात्मो एकः सन्नेतत्त्रयं तदेतदमृतꣳ सत्येन छन्नं प्राणो वा अमृतं नाम

रूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥३॥ ॥ इति षष्ठं ब्राह्मणं ॥ ॥ इति बृहदारण्यके तृतीयोऽध्यायः ॥३॥ ॥ भाष्यम

तं त्रयमोऽध्यायः ॥३॥ ॥

२

LIBRARY UNIVERSITY PENNSYLVANIA

१५५१७